# shrIghaTikAchalahanumatstotram 1

# શ્રીઘટિકાચલહનુમત્સ્તોત્રમ્ ૧

## Document Information

Text title : ghaTikAchalahanumatstotram 1

File name : ghaTikAchalahanumatstotram1.itx

Category : hanumaana, stotra

Location : doc_hanumaana

Transliterated by : Processed by Sowmya Ramkumar

Proofread by : PSA Easwaran

Description-comments : brahmANDapurANataH From Hanumatstutimanjari, Mahaperiaval Publication

Latest update : September 19, 2014

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 17, 2022

*sanskritdocuments.org*

# શ્રીઘટિકાચલહનુમત્સ્તોત્રમ્ ૧

બ્રહ્માણ્ડપુરાણતઃ સ્તોત્રં
અતિપાટલવક્ત્રાબ્જં ધૃતહેમાદ્રિવિગ્રહમ્ ।
આઞ્જનેયં શઙ્ખચક્રપાણિં ચેતસિ ધીમહિ ॥ ૧॥

શ્રીયોગપીઠવિન્યસ્તવ્યત્યસ્તચરણામ્બુજમ્ ।
દરાર્યભયમુદ્રાક્ષમાલાપટ્ટિકયા યુતમ્ ॥ ૨॥

પારિજાતતરોર્મૂલવાસિનં વનવાસિનમ્ ।
પશ્ચિમાભિમુખં બાલં નૃહરેર્ધ્યાનસંસ્થિતમ્ ॥ ૩॥

સર્વાભીષ્ટપ્રદં નૃણાં હનુમન્તમુપાસ્મહે ।
નારદ ઉવાચ
સ્થાનાનામુત્તમં સ્થાનં કિં સ્થાનં વદ મે પિતઃ ।
બ્રહ્મોવાચ
બ્રહ્મન્ પુરા વિવાદોઽભૂન્નારાયણકપીશયોઃ ॥

તત્તેઽહં સમ્પ્રવક્ષ્યામિ સાવધાનમનાઃ શૃણુ ।
એકમાસાદ્વરદઃ સાક્ષાત્ દ્વિમાસાદ્રઙ્ગનાયકઃ ॥ ૧॥

માસાર્ધેન પ્રવક્ષ્યમિ તથા વૈ વેઙ્કટેશ્વરઃ ।
અર્ધમાસેન દાસ્યામિ કૃતં તુ પરમં શિવમ્ ॥ ૨॥

ઘટિકાચલસંસ્થાનાદ્ઘટિકાચલવલ્લભઃ ।
હનુમાનઞ્જનાસૂનૂ રામભક્તો જિતેન્દ્રિયઃ ॥ ૩॥

ઘટિકાદેવ કામ્યાનાં કામદાતા ભવામ્યહમ્ ।
શઙ્ખચક્રપ્રદો યેન પ્રદાસ્યામિ હરેઃ પદમ્ ॥ ૪॥

ઘટિકાચલસંસ્થાને ઘટિકાં વસતે યદિ ।
સ મુક્તઃ સર્વલોકેષુ વાયુપુત્રપ્રસાદતઃ ॥ ૫॥

બ્રહ્મતીર્થસ્ય નિકટે રાઘવેન્દ્રસ્ય સન્નિધૌ ।
વાયુપુત્રં સમાલોક્ય ન ભયં વિદ્યતે નરે ॥ ૬॥

તસ્માદ્વાયુસુતસ્થાનં પવિત્રમતિદુર્લભમ્ ।
પૂર્વાબ્ધેઃ પશ્ચિમે ભાગે દક્ષિણાબ્ધેસ્તથોત્તરે ॥ ૭॥

વેઙ્કટાદ્દક્ષિણે ભાગે પર્વતે ઘટિકાચલે ।
તત્રૈવ ઋષયઃ સર્વે તપસ્તપ્યન્તિ સાદરમ્ ॥ ૮॥

પઞ્ચાક્ષરમહામન્ત્રં દ્વિષટ્કં ચ દ્વિજાતિનામ્ ।
નામમન્ત્રં તતઃ શ્રીમન્ સ્ત્રીશૂદ્રાણામુદાહૃતમ્ ॥ ૯॥

તત્ર સ્નાત્વા બ્રહ્મતીર્થે નત્વા તં વાયુમન્દિરે ।
વાયુપુત્રં ભજેન્નિત્યં સર્વારિષ્ટવિવર્જિતઃ ॥ ૧૦॥

સેવતે મણ્ડલં નિત્યં તથા વૈ હ્યર્ધમણ્ડલમ્ ।
વાઞ્છિતં વિન્દતે નિત્યં વાયુપુત્રપ્રસાદતઃ ॥ ૧૧॥

તસ્માત્ત્વમપિ ભોઃ પુત્ર નિવાસં ઘટિકાચલે ॥ ૧૧॥

નારદ ઉવાચ
કથં વાસઃ પ્રકર્તવ્યો ઘટિકાચલમસ્તકે ।
કેન મન્ત્રેણ બલવાનાઞ્જનેયઃ પ્રસીદતિ ॥ ૧૨॥

વિધાનં તસ્ય મન્ત્રસ્ય હોમં ચૈવ વિશેષતઃ ।
કિયત્કાલં તત્ર વાસં કર્તવ્યં તન્મમાવદ ॥ ૧૩॥

બ્રહ્મોવાચ
બ્રહ્મતીર્થે તતઃ સ્નત્વા હનુમત્સંમુખે સ્થિતઃ ।
દ્વાદશાક્ષરમન્ત્રં તુ નિત્યમષ્ટસહસ્રકમ્ ॥ ૧૪॥

જપેન્નિયમતઃ શુદ્ધસ્તદ્ભક્તસ્તુ પરાયણઃ ।
નિરાહારઃ ફલાહારો બ્રહ્મચર્યવ્રતે સ્થિતઃ ॥ ૧૫॥

મણ્ડલં તત્ર વસ્તવ્યં ભક્તિયુક્તેન ચેતસા ।
ધ્યાનશ્લોકં પ્રવક્ષ્યામિ શ ૃણુ નારદ તત્ત્વતઃ ॥ ૧૬॥

તમઞ્જનાનન્દનમિન્દુબિમ્બનિભાનનં સુન્દરમપ્રમેયમ્ ।
સીતાસુતં સૂક્ષ્મગુણસ્વદેહં શ્રીરામપાદાર્પણચિત્તવૃત્તિમ્ ॥ ૧૭॥

એવં ધ્યાત્વા સદા ભક્ત્યા તત્પાદજલજં મુદા ।

ચતુર્થાંશેન હોમં વા કર્તવ્યં પાયસેન ચ ॥ ૧૮॥

વિધિના વિધિયુક્તસ્તુ વિદિત્વા ઘટિકાચલમ્ ।
જગામ જયમન્વિચ્છન્નિન્દ્રિયાણાં મહામનાઃ ॥ ૧૯॥

એવં નિયમયુક્તઃ સન્ યઃ કરોતિ હરેઃ પ્રિયમ્ ।
વિજયં વિન્દતે દેહી વાયુપુત્રપ્રસાદતઃ ॥ ૨૦॥

ઇતિ બ્રહ્માણ્ડપુરાણતઃ શ્રીઘટિકાચલહનુમત્સ્તોત્રં સમ્પૂર્ણમ્ ।

From Hanumatstutimanjari, Mahaperiaval Publication

Proofread by PSA Easwaran psaeaswaran at gmail

*shrIghaTikAchalahanumatstotram 1*

pdf was typeset on December 17, 2022

Please send corrections to *sanskrit@cheerful.com*